कमला हंसिनी काला करुणा करुणावती ।
भास्वरा भैरवी भासा भद्रकाली कुलाङ्गना ॥ ३१॥

रसात्मिका रसावासा रसस्यन्दा रसावाहा ।
कामनिष्यन्दिनी काम्या कामिनी कामदायिनी ॥ ३२॥

विद्या विधात्री विविधा विश्वधात्री २विधाविधा । var - २त्रिविधा विधा
३सर्वाङ्गसुन्दरी सौम्या ४लावण्यसरिदम्बुधिः ॥ ३३॥ var - ३सर्वाङ्गा सुन्दरी ४लावण्या

चतुराङ्गी चतुर्बाहुश्चतुरा ५चारुहंसिनी । var - ५चारुहासिनी
मन्त्रा मन्त्रमयी माता मणिपूरसमाश्रया ॥ ३४॥

मन्त्रात्मिका मन्त्रमाता मन्त्रगम्या ६सुमन्त्रिता । var - ६सुमन्त्रका
पुष्पबाणा पुष्पजेत्री पुष्पिणी पुष्पवर्धिनी ॥ ३५॥

वज्रेश्वरी वज्रहस्ता पुराणी पुरवासिनी ।
तारा ७सुतरुणी तारा तरुणीताररूपिणी ॥ ३६॥ var - ७च तरुणाकारा

इक्षुचापा महापाशा शुभदा प्रियवादिनी ।
८सर्वदा सर्वजननी सर्वार्था सर्वपावनी ॥ ३७॥ var - ८सर्वगा

आत्मविद्या महाविद्या ब्रह्मविद्या विवस्वती ।
शिवेश्वरी शिवाराध्या शिवनाथा शिवात्मिका ॥ ३८॥

९आत्मिका ज्ञाननिलया निर्भेदा निर्वृतिप्रदा । var - ९आत्मिकज्ञान
निर्वाणरूपिणी १०नित्या नियमा निष्कला प्रभा ॥ ३९॥ var - १०पूर्णा

श्रीफला श्रीप्रदा शिष्या श्रीमयी शिवरूपिणी ।
क्रूरा कुण्डलिनी कुब्जा कुटिला कुटिलालका ॥ ४०॥

महोदया महारूपा ११महामाया कलामयी । var - ११मही माही
वशिनी सर्वजननी चित्रवासा विचित्रका ॥ ४१॥

सूर्यमण्डलमध्यस्था स्थिरा शङ्करवल्लभा ।
सुरभि१२स्सुमनस्सूर्या सुषुम्ना सोमभूषणा ॥ ४२॥ var - १२स्सुमहस्सूर्या

सुधाप्रदा सुधाधारा सुश्रीस्सम्पत्तिरूपिणी ।
अमृता सत्यसङ्कल्पा सत्या षड्ग्रन्थिभेदिनी ॥ ४३॥

इच्छाशक्तिर्महाशक्तिः क्रियाशक्तिः प्रियङ्करी ।

